# Shri Bala Karpura Stotram

# श्रीबालाकर्पूरस्तोत्रम्

## Document Information

Text title : Shri Bala Karpura Stotram

File name : bAlAkarpUrastotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH, Paratantra

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

Shri Bala Karpura Stotram

# श्रीबालाकर्पूरस्तोत्रम्

कर्पूराभेन्दुगौरां शशिसकलधरां रक्तपद्मासनस्थां
विद्यापात्राक्षमुद्राधृतकरकमलां त्वां स्मरन्सन् त्रिलक्षम् ।
जप्त्वा चन्द्रार्धभूषं सुरुचिरमधरं बीजमाद्यं तवेदं
हुत्वा पश्चात्पलाशैः स भवति कविराड् देवि बाले महेशि ॥ १॥

हस्ताब्जैः पात्रपाशाङ्कुशकुसुमधनुर्बीजपूरां दधानां
रक्तां त्वां संस्मरन्सन् प्रजपति मनुजो यस्त्रिलक्षं भवानि ।
वामाक्षी चन्द्रसंस्थं क्षितिसहितविधिं कामबीजं तवेदं
चन्द्रैर्हुत्वा दशांशं स नयति सकलान् वश्यतां सर्वदैव ॥ २॥

विद्याक्षज्ञानमुद्राऽमृतकलशधरां त्वां मनोज्ञां किशोरीं
स्मेरां ध्यायंस्त्रिनेत्रां शशधरधवलां यो जपेद्वै त्रिलक्षम् ।
जीवं सङ्कर्षणाढ्यं तव सुरनमिते सर्गयुक्तं सुबीजं
हुत्वाऽन्ते मालतीभिर्भवति स ललिते श्रीयुतो भोगवांश्च ॥ ३॥

ध्यायंस्त्वां पुस्तकाक्षाभयवरदकरां लोहिताभां कुमारीं
कश्चिद्यः साधकेन्द्रो जपति कुलविधौ प्रत्यहं षट्सहस्रम् ।
मातर्वाङ्मारशक्तिप्रयुतमनुमिमं त्र्यक्षरं त्रैपुरं ते
भुक्त्वा भोगाननेकान् जननि स लभतेऽवश्यमेवाष्टसिद्धीः ॥ ४॥

आरक्तां कान्तदोर्भ्यां मणिचषकमथो रत्नपद्मं दधानां
वाङ्मायाश्रीयुतान्यं मनुमयि ललिते तत्त्वलक्षं जपेद्यः ।
ध्यायन् रूपं त्वदीयं तदनु च हवनं पायसान्नैः प्रकुर्याद्-
योगीशस्तत्त्ववेत्ता परशिवमहिले भूतले जायते सः ॥ ५॥

वाणी चेटी रमा वाग्भवमथ मदनः शक्तिबीजं च षड्भिः
एतैश्चन्द्रार्धचूडे भवति तव महामन्त्रराजः षडर्णः ।
जप्त्वैनं साधको यः स्मरहरदयिते भक्तितस्त्वामुपास्ते
विद्यैश्वर्याणि भुक्त्वा तदनु स लभते दिव्यसायुज्यमुक्तिम् ॥ ६॥

महाबिन्दुः शुद्धो जननि नवयोन्यन्तरगतो
भवेदेतद्बाह्ये वसुछदनपद्मं सुरुचिरम् ।
ततो वेदद्वारं भवति तव यन्त्रं गिरिसुते
तदस्मिन् त्वां ध्यायेत् कहरिहररुद्रेश्वरपदाम् ॥ ७॥

नवीनादित्याभां त्रिनयनयुतां स्मेरवदनां
महाक्षस्त्रग्विद्याऽभयवरकरां रक्तवसनाम् ।
किशोरीं त्वां ध्यायन्निजहृदयपद्मे परशिवे
जपेन्मोक्षाप्त्यर्थं तदनु जुहुयात् किंशुकसुमैः ॥ ८॥

हृदम्भोजे ध्यायन् कनकसदृशामिन्दुमुकुटां
त्रिनेत्रां स्मेरास्यां कमलमधुलुङ्गाङ्कितकराम् ।
जपेद्दिग्लक्षं यस्तव मनुमयो देवि जुहुयात्
सुपक्वैर्मालूरैरतुलधनवान् स प्रभवति ॥ ९॥

स्मरेद्धस्तैर्वेदाभयवरसुधाकुम्भधरिणीं
स्रवन्तीं पीयूषं धवलवसनामिन्दुशकलाम् ।
सुविद्याप्त्यै मन्त्रं तव हरनुते लक्षनवकं
जपेत्त्वां कर्पूरैरगरु सहितैरेव जुहुयात् ॥ १०॥

सहस्रारे ध्यायन् शशधरनिभां शुभ्रवसनां
अकारादिक्षान्तावयवयुतरूपां शशिधराम् ।
जपेद्भक्त्या मन्त्रं तव रससहस्रं प्रतिदिनं
तथारोग्याप्त्यर्थं भगवति गुडूच्यैः प्रजुहुयात् ॥ ११॥

कुलज्ञः कश्चिद्यो यजति कुलपुष्पैः कुलविधौ
कुलागारे ध्यायन् कुलजननि ते मन्मथकलाम् ।
षडर्णं पूर्वोक्तं जपति कुलमन्त्रं तव शिवे
स जीवन्मुक्तः स्यादकुलकुलपङ्केरुहगते ॥ १२॥

शिवे मद्यैर्मांसैश्चणकवटकैर्मीनसहितैः
प्रकुर्वंश्चक्रार्चां सुकुलभगलिङ्गामृतरसैः ।
बलिं शङ्कामोहादिकपशुगणान्यो विदधति
त्रिकालज्ञो ज्ञानी स भवति महाभैरवसमः ॥ १३॥

मनोवाचागम्यामकुलकुलगम्यां परशिवां

स्तवीमि त्वां मातः कथमहमहो देवि जडधीः ।
तथापि त्वद्भक्तिर्मुखरयति मां तद्विरचितं
स्तवं क्षन्तव्यं मे त्रिपुरललिते दोषमधुना ॥ १४॥

अनुष्ठानध्यानार्चामनु समुद्धारणयुतं
शिवे ते कर्पूरस्तवमिति पठेदर्चनपरः ।
स योगी भोगी स्यात् स हि निखिलशास्त्रेषु निपुणः
यमोऽन्यो वैरीणां विलसति सदा कल्पतरुवत् ॥ १५॥

बालां बालदिवाकरद्युतिनिभां पद्मासने संस्थितां
पञ्चप्रेतमयाम्बुजासनगतां वाग्वादिनीरूपिणीम् ।
चन्द्रार्कानलभूषितत्रिनयनां चन्द्रावतंसान्वितां
विद्याक्षाभयधारिणीं वरकरां वन्दे परामम्बिकाम् ॥ १६॥

इति श्रीपरातन्त्रान्तर्गतं श्रीबालाकर्पूरस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

---

*Shri Bala Karpura Stotram*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*